# चतुर्थः पाठः

# हिमालयः

भारतदेशस्य सुविस्तृतायाम् उत्तरस्यां दिशि स्थितो गिरिः पर्वतराजो हिमालय इति नाम्नाभिधीयते जनैः। अस्य महोच्चानि शिखराणि जगतः सर्वानपि पर्वतान् जयन्ति। अतएव लोका एनं पर्वतराजं कथयन्ति। अस्योन्नतानि शिखराणि सदैव हिमैः आच्छादितानि तिष्ठन्ति। अत एवास्य हिमालय इति हिमगिरिरित्यपि च नाम सुप्रसिद्धम्। 'एवरेस्ट', 'गौरीशङ्कर' प्रभृतीनि अस्य शिखराणि जगति उन्नततमानि सन्ति। अस्य अधित्यकायां त्रिविष्टप-नयपाल-भूतान-देशाः पूर्णसत्तासम्पन्नाः,कश्मीरहिमाचलप्रदेशासम-सिक्किम-मणिपुरप्रभृतयाः भारतीयाः प्रदेशाः सन्ति। उत्तरभारतस्य पर्वतीयो भागोऽपि हिमालयस्यैव प्रान्तरे तिष्ठति।

अयं पर्वतराजः भारतवर्षस्य उत्तरसीम्नि स्थितः तत् प्रहरीव शत्रुभ्यः सततं रक्षति। हिमालयादेव समुद्गम्य गङ्गा-सिन्धु-ब्रह्मपुत्राख्याः महानद्यः, शतद्रि-विपाशा-यमुना-सरयू-गण्डकी-नारायणीकौशिकीप्रभृतयः नद्यश्च समस्तामपि उत्तरभारतभुवं स्वकीयैः तीर्थोदकैः न केवलं पुनन्ति अपितु इमां शस्यश्यामलामपि कुर्वन्ति।

अस्योपत्यकासु सुदीर्घाः वनराजयो विराजन्ते, यत्र विविधाः ओषधयो वनस्पतयस्तरवश्च तिष्ठन्ति। इमाः ओषधयः जनान् आमयेभ्यो रक्षन्ति, तरवश्च आसन्द्यादिगृहोपकरणनिर्माणार्थं प्रयुज्यन्ते। हिमालयः वर्षर्तौ दक्षिणसमुद्रेभ्यः समुत्थिता मेघमाला अवरुध्य वर्षणाय ताः प्रवर्तयति।

अस्योपत्यकायां विद्यमानः कश्मीरो देशः स्वकीयाभिः सुषमाभिः भूस्वर्ग इति संज्ञया अभिहितो भवति लोके, ततश्च पूर्वस्यां दिशि स्थितः किन्नर-देशो देवभूमिनाम्ना प्राचीनसाहित्ये प्रसिद्धः आसीत्। अद्यापि 'कुलूघाटी' इति नाम्ना प्रसिद्धोऽयं प्रदेशः रमणीयतया केषां मनो न हरति। शिमला-देहरादून-मसूरी-नैनीताल-प्रभृतीनि नगराणि देशस्य सम्पन्नान् जनान् ग्रीष्मर्तौ बलादिव भ्रमणाय आकर्षन्ति। एभ्योऽपि पूर्वस्मिन् भागेऽवस्थितः रमणीयतमः प्रदेशः कामरूपतया 'कामरूप' इति संज्ञया अभिधीयते।

अस्यैव कन्दरासु तपस्यन्तः अनेके ऋषयो मुनयश्च परां सिद्धिं प्राप्तवन्तः। अस्य सिद्धिमत्वं विलोक्यैव 'उपह्वरे गिरीणां संगमे च नदीनां धिया विप्रोऽजायत' इत्यादि कथयन्तः वैदिका ऋषयः अस्य महत्त्वं स्वीकृतवन्तः। पुराणेषु सर्वविधानां सिद्धीनां प्रदातुः शिवस्य स्थानम् अस्यैव पर्वतस्य कैलासशिखरे स्वीकृतमस्ति। अस्यैव प्रदेशेषु बदरीनाथ-केदारनाथ-पशुपतिनाथ-हरिद्वार-हृषीकेश-वैष्णवदेवी-ज्वालादेवीप्रभृतीनि तीर्थस्थानानि सन्ति।

अतएव पर्वतराजोऽयं हिमालयः रक्षकतया, पालकतया, सर्वौषधिभिः संरक्षकतया, सर्वसिद्धिप्रदातृतया च भारतीयेषु जनेषु सुतरां समादृतः पर्वतराजः इति।

## अभ्यास प्रश्न

### ➡ लघु उत्तरीय प्रश्न

१. कस्य शिखराणि सदैव हिमैः आच्छादितानि सन्ति?
२. हिमालय पर्वतः भारतदेशस्य कस्यां दिशि वर्तते?
३. हिमालयस्य सर्वोच्च पर्वतशिखरस्य किं नाम?
४. हिमालयस्य कानि शिखराणि सर्वोच्चानि सन्ति?
५. कस्य कन्दरासु मुनयः सिद्धिं प्राप्तवन्तः?
६. हिमालयात् काः काः नद्यः निःसरन्ति?
७. हिमालयस्य उपत्यकायां के प्रदेशाः सन्ति?
८. कस्य पर्वतराजस्य शिखराणि सर्वानपि पर्वतान् जयन्ति?
९. कः देशः 'भू-स्वर्गः' इति संज्ञया अभिहितो भवति?

१०. हिमालये कानि-कानि नगराणि सन्ति?
११. कस्य उपत्यकासु सुदीर्घा: वनराजयो विराजन्ते?
१२. कस्य शोभा पर्यटकानां हृदयं मोहयति?
१३. कस्य उपत्यकायां कश्मीरो प्रदेश: विद्यते?
१४. हिमालय: प्रहरीव शत्रुभ्य: कं रक्षति?
१५. 'कुलूघाटी' प्रदेशस्य प्राचीनसाहित्ये किं नाम आसीत्?
१६. हिमालयस्योपत्यकासु के विराजन्ते?
१७. कश्मीरो देश: कस्योपत्यकायां विद्यमान: अस्ति।
१८. हिमालयप्रदेशेषु कानि तीर्थस्थानानि सन्ति?

## ➡ अनुवादात्मक प्रश्न

**१. निम्नलिखित अवतरणों का ससन्दर्भ हिन्दी-अनुवाद कीजिए—**
(क) भारतदेशस्य ............................ उन्नततमानि सन्ति।
(ख) अयं पर्वतराज:.................................... कुर्वन्ति।
(ग) अस्योपत्यकासु................................. प्रवर्तयति।
(घ) अस्योपत्यकायां ................................. आकर्षन्ति।
(ङ) अस्यैव कन्दरासु .................................... सन्ति।

**२. निम्न सूक्तिपरक पंक्ति की ससन्दर्भ हिन्दी-व्याख्या कीजिए—**
"उपह्वरे गिरीणां संगमे च नदीनां धिया विप्रोऽजायत"

**३. निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए—**
(क) भारत की उत्तर सीमा में हिमालय पर्वत है।
(ख) हिमालय के ऊँचे शिखर सर्वदा बर्फ से ढके रहते हैं।
(ग) हिमालय से गंगा, यमुना, ब्रह्मपुत्र आदि नदियाँ निकलती हैं।
(घ) हिमालय भारतवर्ष की रक्षा करता है।
(ङ) कश्मीर की शोभा पर्यटकों का मन मोह लेती है।

## ➡ व्याकरणात्मक प्रश्न

**१. निम्नलिखित शब्दों में सन्धि-विच्छेद कीजिए—**
हिमगिरिरिति, हिमालयस्यैव, प्रहरीव, तरवश्च, महोच्चानि।

**२. निम्नलिखित शब्दों में विभक्ति और वचन बताइए—**
शिखराणि, हिमै:, उत्तरस्याम्, भारतीयान्, भूभागे।

## शब्दार्थ

**नाम्नाभिधीयते** (नाम्ना + अभिधीयते) = नाम से पुकारा जाता है। **हिमगिरिरित्यपि** = (हिमगिरि: + इति + अपि) = हिमगिरि भी। **उत्तरसीम्नि** = उत्तरी सीमा पर। **उपत्यका** = घाटी। **अधित्यका** = पहाड़ का ऊपरी मध्य भाग। **प्रान्तरे** = अन्तर्वर्ती भू-भाग में। **पुनन्ति** = पवित्र बनाते हैं। **आमयेभ्य:** = रोगों से। **एभ्योऽपि** = इनके भी। **आसन्द्यादि** = गद्दीदार आराम कुर्सी आदि। **धिया** = बुद्धि से। **सुतरां समादृत:** = अत्यन्त आदर प्राप्त। **उपह्वरे** = गुफा में। **विप्रोऽजायत** = (विप्र: + अजायत) ब्राह्मण हुए। **प्रदातु:** = प्रदान करनेवाले। **सर्वसिद्धिप्रदातृतया** = समस्त सिद्धियों को प्रदान करने के कारण। **सुतराम्** = अत्यन्त। **समादृत:** = आदर पानेवाला। **पर्वतराजोऽयम्** (पर्वतराज: + अयम्) यह पर्वतराज। **सर्वौषधिभि:** = (सर्व+ओषधिभि:) सभी ओषधियों से।

●●